व्याकरणशास्त्रस्य संक्षिप्तपरिचयः

''व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति शब्दज्ञानजनकं व्याकरणम्'' ।वि + आङ् इत्युपसर्गपूर्वकात् कृ-धातोः करणे ल्युट्प्रत्यये कृते व्याकरणशब्दो निष्पद्यते। सामान्यतः शब्दसाधुत्वज्ञानमेव व्याकरणशास्त्रस्य मुख्यं प्रयोजनमस्ति। स्वयमेव भगवान् पतञ लिः प्राह- अथ शब्दानुशासनम् इति। अनुशिष्यन्ते अपशब्देभ्यो विविच्य कथ्यन्ते साधुशब्दा अनेनेत्यनुशासनम्। शब्दानुशासनं नाम-सूत्रवार्तिक-भाष्य-व्याख्यानादिरूपं शास्त्रमिति। अखिलेऽस्मिन् संस्कृतवाङ्मये व्याकरणशास्त्रस्य स्थानं सर्वोपरि वर्तते। यतोहि व्याकरणशास्त्रस्य ज्ञानं विना वेद-स्मृति-पुराण-इतिवृत-काव्यकोशादीनां केषामपि शास्त्रान्तराणां ज्ञानं भवितुं नार्हति, अतः शास्त्रान्तराणां ज्ञानार्थं व्याकरणाध्ययनमावश्यकं मन्यते। व्याकरणमहाभाष्ये भगवता पतञ लिना व्याकरणशास्त्रस्य मुख्यानि प्रयोजनानि इमानि प्रोक्तानि-''रक्षोहागमलघ्वसन्देहाः प्रयोजनम्'' इति। अर्थात् रक्षा, ऊह, आगम, लघु, असन्देहाश्च व्याकरणशास्त्राध्ययनस्य मुख्यानि प्रयोजनानि सन्ति। एतदतिरिक्तानि गौणप्रयोजनानि अपि महर्षिणा परिगणितानि।

व्याकरणविदुषां परिचयः

महर्षिः पाणिनिः -व्याकरणशास्त्रपरम्परायांब हवो ि वद्वांसोऽभूवन् ।त ेषुम हर्षि:प ाणिनिरन्यतमः।म हर्षे:प ाणिनेः जन्मस्थान-जन्मसमयादिविषये विदुषां नैकमत्यं दृश्यते। त्रिकाण्डशेषाख्ये कोषे पाणिनेः षड् नामानि लभन्ते, यथा- पाणिनः, अहिकः, दाक्षीपुत्रः, शालङ्किः, पाणिनिः, शालातुरीयश्च। एभिर्नामभिरेषां गोत्रस्य, माता-पित्रोः देशस्य च निर्णयः कर्तुं शक्यते। एषु पाणिनः पाणिनिश्च इमौ द्वौ गोत्रव्यपदेशजौ स्तः। अस्य जननी दाक्षी आसीत्, अतोऽस्याभिधानं दाक्षीपुत्रोऽप्यस्ति। उक्तञ्च महर्षिणा पतञ लिना ''सर्वे सर्वपदादेशा: दाक्षीपुत्रस्य पाणिनेः'' इति। केषाञ्चि त् विदुषां मतानुसारमस्य जनकस्य नाम शलङ्कः आसीत्। अतः अस्याभिधानं शालङ्किः सञ ातम्। शालतुरीयः अस्य जन्मप्रदेशः आसीत्। गणरत्नमहोदधिनामकग्रन्थे अस्य व्युत्पत्तिरित्थं प्राप्यते यत्- ''शालातुरो नाम ग्रामः सोऽभिजनोऽस्यास्तीति शालातुरीयस्तत्र भवान् पाणिनिः''। अतोऽनेन स्पष्टं भवतीति यत् महर्षेः जन्मस्थानं शालातुराख्यो ग्राम एवास्ति, यः साम्प्रतं लाहोरनाम्ना प्रसिद्धो वर्तते। तथैतत् सम्प्रति पाकिस्तानदेशस्य विशालतमेषु नगरेष्वन्यतमं मन्यते।

शिक्षा- महर्षेः पाणिनेः प्रारम्भिकी शिक्षा तक्षशिलानामके नगरेऽभूत्। अस्य गुरुः उपवर्षाचार्यः आसीत्। यो नालन्दाविश्वविद्यालयस्यअ ाचार्येषुस ुविख्यात:अ ासीत्।म हर्षि:प ाणिनि:स् वाध्ययनकालेभ गवन्तं ि शवं समर्च्य तं प्रसादयामास। शिवोपदेशेन च '**अष्टाध्यायी**' इत्याख्यमद्वितीयं व्याकरणशास्त्रमरचयत्।

महर्षेः स्तुतौ उक्तं यत्-

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।।

जन्मकाल:- पाश्चात्यैः विद्वद्भिः महर्षेः पाणिनेः समयः विक्रमवर्षात् ६५७ वैक्रमात् पूर्वतः २५८ विक्रमवर्षपूर्वं स्वीकृतोऽस्ति।अ न्तःस ाक्ष्यभूतःस ंस्कृतव्याकरणशास्त्रस्येतिहासेश्र ीमान्य ुधिष्ठिरमीमांसक:व ैक्रमाब्दात् २८०० वर्षपूर्वं पाणिनेः कालं निश्चितवान्।

महर्षिपाणिनेः कृतयः:- १. अष्टाध्यायी, २. सूत्रपाठः, ३. धातुपाठः, ४. गणपाठः, ५. लिङ्गानुशासनम्,६. जाम्बवतीविजयम्।

आचार्य-कात्यायनः

पाणिनेरष्टाध्यायीमधिकृत्य अनेकैराचार्यैर्विविधा ग्रन्थाः लिखिताः। तेषु महामुनिः कात्यायनः अन्यतमः विद्यते। पाणिनिकात्यायनौ सतीर्थ्यौ आस्ताम्। कात्यायनोऽस्य गोत्रजाभिधानमस्ति। अस्य मूलनाम **वररुचिः**

आसीत्। 'प्रियतद्धिता दाक्षिणात्या:'इत्यनेन महाभाष्यवचनेन प्रतीयते यत् कात्यायनो दाक्षिणात्य: आसीत्। असौ मुनि: स्वकीयगोत्रनाम्नैव प्रसिद्धिमलभत। अस्य वार्तिकग्रन्थो निम्नाङ्कितैर्वार्तिकलक्षणै: परिपूर्णोऽस्ति। यथा–

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा मनीषिण:।।

कात्यायनस्य वार्तिकपाठ: पाणिनिव्याकरणस्य एकं महत्त्वपूर्णमङ्गं वर्तते। एतस्मात् कारणात् सूत्रवार्तिक –कारयोरालोके नान्यत् किमपि व्याकरणं प्रादुरभूत्। महामुनि: कात्यायन: महाकविरपि आसीत्। अस्य 'स्वर्गारोहणं' इत्याख्यस्य काव्यस्य वैशिष्ट्यं अनेकेषु ग्रन्थेषु वर्णितं दृश्यते। तद्यथा–

य: स्वर्गाहरणं कृत्वा स्वर्गमानीतवान् भुवि।
काव्येन रुचिरेणैव ख्यातो वररुचि: कवि:।।

महर्षि: पतञ्जलि:

महामुनि: पतञ्जलि: योग–व्याकरण–वैद्यशास्त्रेषु पारङ्गत: आसीत्। एतेषु विषयेषु बहव: ग्रन्था: अनेन विरचिता:। उक्तञ्च –

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि।।

असौ महर्षि: महाभाष्यकाररूपेण प्रसिद्धोऽस्ति। नीरसमपि व्याकरणशास्त्रं स्वकीयाभिनवशैल्या सरसं कृतवान्। यदधीत्य दैशिका: वैदेशिकाश्च विद्वांस: इदं महाभाष्यं मुक्तकण्ठेन प्रशंसन्ति। अस्य ग्रन्थस्य आकार: विशालाकृतित्वात् महाभाष्यनाम सार्थकं प्रतीयते। विष्णुधर्मोत्तरपुराणे महाभाष्यलक्षणं यथा–

सूत्रार्थो वर्ण्यते यत्र वाक्यै: सूत्रानुसारिभि:।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदु:।।

अयं महामुनि: पतञ्जलि: प्राचीनेषु ग्रन्थेषु अनेकै: पर्यायैरवगम्यते। तथाहि गोर्नदीय:, गोणिकापुत्र:, नागनाथ:, अहिपति:, फणिभृत्, शेषराज:, शेषाहि:, चूर्णिकार:, पदकारश्चेति। गोणिकापुत्रशब्द: पाणिने: परिचायकस्तर्हि अस्य मातुर्नाम गोणिका इति प्रतीयते।

स्थितिकाल:– व्याकरणमहाभाष्ये 'पुष्यमित्रो यजते' 'इह पुष्यमित्रं यजमान:' इत्यादय: प्रयोगा: प्राप्नुवन्ति। अनेन प्रतीयते यदसौ राज्ञ: पुष्यमित्रस्य समकालिक: आसीत्। यदि पुष्यमित्रस्य समय: ई. पू. द्वितीयशताब्दी मन्यते तर्हि भाष्यकारस्य काल: ई. पू. १५० भवितुमर्हति। म.म.गिरिधरशर्ममहोदय: अपि भाष्यकारस्य स्थितिकाल: ई.पू. द्वितीयाब्द एवाङ्गीकृतवान्।

भट्टोजिदीक्षित:

वैयाकरणसिद्धान्तकौमुदीकार: श्रीमान् भट्टोजिदीक्षितो महाराष्ट्रियो ब्राह्मण आसीत्। अस्य पितुर्नाम श्रीलक्ष्मीधरभट्ट:, भ्राता रङ्गोजिभट्ट:, द्वौ पुत्रौ भानुजीदीक्षित–वीरेश्वरदीक्षितौ चास्ताम्। अस्य गुरु:

प्रक्रिया -कौमुद्याः प्रकाशटीकाकारः श्रीशेषकृष्णः आसीत्। अयं श्रीमतः शेषकृष्णादेव सम्पूर्णं व्याकरणशास्त्र-मधीतवान्। स्वकीये शब्दकौस्तुभे ग्रन्थे स्वयमपि भट्टोजिदीक्षितः श्रीमतेअप्पय्यदीक्षिताय नमस्करोति स्म। यथा-

अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे।

यत् कृति बोधाबोधौ विद्वदविद्वद् विभाजकोपाधौ।।

स्थितिकालः- डा. वेल्वाकरमतेऽस्य समयः १६५७-१७०७ वि.सं. वर्तते। अन्ये विद्वांसः अस्य कालः १६३६ वि.सं स्वीकुर्वन्ति।

कृतयः- श्रीमान् भट्टोजिदीक्षितो व्याकरणशास्त्रे बहून् ग्रन्थान् रचितवान्। १. शब्दकौस्तुभः, २. तत्त्वकौस्तुभः, ३. तन्त्रसिद्धान्तदीपिका, ४. वैयाकरणसिद्धान्तकारिका, ५. वैयाकरणसिद्धान्तकौमुदी, ६. प्रौढमनोरमा, ७. वेदभाष्यकारः, ८. तैत्तिरीयसन्ध्याभाष्यम्, ९. तिथिनिर्णयः।

अस्य वैयाकरणसिद्धान्तकौमुदी साम्प्रतमुपलब्धेषु व्याकरणशास्त्रग्रन्थेषु श्रेष्ठं स्थानं भजते।

आचार्यवरदराजः

आचार्यवरदराजः दाक्षिणात्यः ब्राह्मणः आसीत्। अस्य जनकः श्रीदुर्गातनयो गुरुश्च श्रीभट्टोजिदीक्षितः आस्ताम्। मध्यसिद्धान्तकोमुद्यां वरदराजः स्वकीयं गुरुवरं भट्टोजिदीक्षितं प्राणमत्।

तथाहि-

नत्वा वरदराजः श्रीगुरून् भट्टोजिदीक्षितान्।

करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम्।।

वरदराजःभट्टोजिदीक्षितस्य शिष्यः आसीत्। अत एव वरदराजः स्वगुरोः भट्टोजिदीक्षितस्य समकालिकः आसीदिति प्रतीयते। आचार्यवरदराजः मध्यसिद्धान्तकौमुद्याः रचनानन्तरं व्याकरणशास्त्रस्य प्रथमसोपानरूपां लघुसिद्धान्तकौमुदीं लिखितवान्। स्त्रीप्रत्ययप्रकरणस्यान्ते स्वयमेवग्रन्थकारः इत्थं प्रतिपादयति यत्-

शास्त्रान्तरे प्रविष्टानां बालानां चोपकारिका।

कृता वरदराजेन लघुसिद्धान्तकौमुदी।।

संस्कृतव्याकरणस्य शीघ्रं सामान्यज्ञानाय लघुसिद्धान्त-मध्यसिद्धान्तकौमुदीभ्यां सदृशः कोऽपि अन्यो ग्रन्थः भवितुं न शक्नोति। इत्यत्र नास्ति सन्देहलेशः।